क्षान्तयोरधोऽक्ष्णोर्बाह्यतोऽपाङ्गौ नाम तत्रान्ध्यं दृष्ट्युपघातो वा इति" तत्कारणञ्चोक्तम् "शोणितमतिनिर्ह्रियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत् । अत्युष्णाभिखिन्नातिविद्धेष्वक्ष्णोर्विस्रावितमतिप्रवर्त्तते अतिप्रवृत्तं शिरोऽभितापमान्ध्यमधिमन्थं तिमिरप्रादुर्भावमित्यादि चापादयति" सुश्रु०। २ प्रकाशशून्यत्वे "जगदान्ध्यप्रसङ्गः" वे०प्र०

**आन्ध्र** पु० आ+अन्ध–रन् । १ देशभेदे २ तद्देशवासिनि ३ तन्नृपे च ब०व०। "आन्ध्राः शका पुलिन्दाश्च यवनाश्च नराधिपाः" भा०व०प०१८८अ०। स च देशः वृ०स०कूर्म्मविभागे आग्नेय्यां दिशि वर्णितः यथा "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः कौणिकविदर्भवत्सान्ध्रचेदिकाश्चोर्द्ध्वकण्ठाश्च" ग्रहभक्तौ च तत्रैवोक्तम् "द्रविडविदेहान्ध्रम्लेच्छकभासापुरं कौङ्कणाः समान्त्रीषकाः । कुन्तलकेरलदण्डककान्तिपुरम्लेच्छसङ्करजाः । नासिक्यभोगवर्द्धनविराटविन्ध्याद्रिपार्श्वगादेशाः । ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम्" । तेन विन्ध्याद्रिपार्श्वगः गोमतीतापीनद्योःसन्निकृष्टोऽयं देश इति गम्यते ।

**आन्न** त्रि० अन्नं लब्धा अन्न+ण । अन्नं लब्धरि ।

**आन्यतरेय** पुंस्त्री० अन्यतरस्यापत्यम् शुभ्रा० ढक् । अन्यतरस्यापत्ये स्त्रियां ङीप् ।

**आन्यभाव्य** न० अन्योभावोयस्य अन्यभावः तस्य भावः ब्राह्म० ष्यञ् । अन्यरूपत्वे । [स्त्रियां ङीप्

**आन्वयिक** त्रि० अन्वये प्रशस्तकुले भवः ठञ् । प्रशस्तकुलजाते

**आन्वष्टक्य** न० अन्वष्टका+स्वार्थे ष्यञ् । अन्वष्टकाशब्दार्थे "अपरेद्युरान्वष्टक्यम्" आश्व०गृ० ।

**आन्वाहिक** त्रि० अहनि अहनि अन्वहम् तत्र भवः ठञ् अनुश० द्विपदवृद्धिः । प्रतिदिनसाध्ये पाकादौ "वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म्म यथाविधि । पञ्चयज्ञविधानञ्च पक्तिञ्चान्वाहिकीं गृही" मनुः ।

**आन्वीक्षिकी** स्त्री श्रवणादनु ईक्षा पर्य्यालोचना साप्रयोजनमस्याः ठञ् । तर्कविद्यायाम् गौतमप्रणीतायामात्मविद्यायाम् । तत्प्रतिपादकग्रन्थश्च अक्षपादेन पञ्चाध्यायी रचितः तत्रादिमं सूत्रं "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति अन्तिमसूत्रञ्च "हेत्वाभासाश्च यथोक्ताः" इति । तत्र प्रतिपाद्यविषयाश्च पदार्थतत्त्वज्ञानानुमुक्तिफलं तत्र क्रमोक्तिः । प्रत्यक्षानुमानोपमानागमरूपप्रमाणचतुष्टयम् तेषां लक्षणविभागादि । आत्मदेहेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गरूपप्रमेयविभागः । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मलिङ्गानि । चेष्टावदन्त्यावयवित्वमिन्द्रियाश्रयत्वं वा देहलक्षणम् । घ्राणरसनचक्षुस्त्वक्श्रोत्ररूपेन्द्रियविभागः तेषां पृथिव्यादिभ्यः क्रमेणोत्पत्तिः । तत्कारणानि च क्रमेण पृथिव्यप्तेजोवाय्वाकाशात्मकानि पञ्च भूतानि । गन्धरसरूपस्पर्शशब्दरूपविषयपञ्चकं पृथिव्यादीनां विशेषगुणास्तेषां च क्रमेण घ्राणादिभिर्ग्राह्यता । महत्तत्त्वापर्य्यायाया बुद्धेर्ज्ञानरूपत्वम् । मनसो लक्षणम् । प्रवृत्तिलक्षणम् रागद्वेषाभिनिवेशरूपदोषत्रयलक्षणम् । पुनरुत्पत्तिरूपप्रेत्यभावलक्षणम् प्रवृत्तिजनितार्थरूपफललक्षणम्। बाधनारूपं दुःखलक्षणम् । दुःखात्यन्तनिवृत्तिरूपापवर्गलक्षणम् । एकस्मिन् धर्म्मिणि भावाभावविरुद्धकोटिद्वयज्ञानत्वं संशयलक्षणम् तत्र साधारणधर्म्मवद्धर्म्मिज्ञानमसाधारणधर्म्मवद्धर्म्मिज्ञानं विप्रतिपत्तिवाक्यजन्यकोटिद्वयोपस्थितिश्च कारणम् । प्रवृत्तिहेत्विच्छाविषयत्वं प्रयोजनलक्षणम् । वादिप्रतिवादिनोः साध्यसाधनद्वयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयत्वं दृष्टान्तलक्षणम् प्रतिवादिनिरसनेन निःसन्दिग्धतया अर्थनिश्चयरूपत्वं सिद्धान्तलक्षणम् । सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्त इति सिद्धान्तचतुष्टयविभागाः तल्लक्षणानि च। प्रतिज्ञाहेतूदाहरणोपनयनिगमरूपावयवविभागः । भाष्ये तु जिज्ञासा, संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति अधिकाः पञ्चावयवा उक्तास्तेन दशावयवा इति स्थितम् । तात्पर्य्यटीकायां तद्व्याख्यातञ्च तत्र जिज्ञासाऽज्ञातादिबुद्धिसिद्धये प्रवर्त्तिका इच्छा जिज्ञासा । तज्जन्यश्च संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः इति । जिज्ञासा विप्रतिपत्तिरिति केचित् । एतेषां न्यायावयवत्वं नास्तीति वृत्तौ स्थितम् । साध्यविशिष्टतया पक्षस्य निर्देशः प्रतिज्ञालक्षणम् व्याप्तिविशिष्टहेतुबोधकः शब्दो हेतुरूपावयवः । व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विविधा तथा च ज्ञातान्वयव्याप्तिकहेतुबोधकः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधकश्च । साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्तिप्रदर्शकः उदाहरणम् तत्र व्याप्तिश्च द्विविधा अन्वयो व्यतिरेकश्च । प्रकृतोदाहरणोपदर्शितव्याप्तिमद्धेतुविशिष्टपक्षबोधक उपनयावयवः व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विधा